## षट्कतिकतिपयचतुरां थुक्। (५१/१८५१)

डट् इति अनुवर्तते, [1]तदिह सप्तम्या विपरिणम्यते । षट् कति कतिपय चतुर् इत्येषां डटि परतस्थुगागमो भवति । कतिपयशब्दो न [2]सङ्ख्या । तस्यास्मादेव ज्ञापकात् डट् प्रत्ययो [3]विज्ञायते । षण्णां पूरणः षष्ठः । कतिथः । कतिपयथः[4] । चतुर्थः ।

[५७१] चतुरश्छयतावाद्यक्षरलोपश्च । (म. भा. २. ३८४)

चतुर्णां पूरणः तुरीयः, तुर्यः ॥

## बहुपूगगणसङ्घस्य तिथुक्। (५२/१८५२)

डट् इत्येव । [5]बहु पूग गण सङ्घ इत्येतेषां डटि परतः तिथुगागमो भवति । पूगसङ्घशब्दयोर[6]सङ्ख्या–त्वादिदमेव ज्ञापकं डटो भावस्य । बहूनां पूरणः बहुतिथः । पूगतिथः । गणतिथः । सङ्घतिथः ॥

## वतोरिथुक्। (५३/१८५३)

डट् इत्येव । वतोर्डटि परतः इथुगागमो भवति । वत्वन्तस्य संख्यात्वात् [7]पूर्वेण[8] डड् विहितः, तस्मिन्न[9]यमागमः विधीयते । यावतां पूरणः यावतिथः । तावतिथः । [10]एतावतिथः ॥

## द्वेस्तीयः। (५४/१८५४)

द्विशब्दात् तीयः प्रत्ययो भवति तस्य पूरणे [11]इत्यस्मिन् [12]विषये । डटोऽपवादः । द्वयोः पूरणः द्वितीयः ॥

## त्रेः सम्प्रसारणं च। (५५/१८५५)

त्रिशब्दात् तीयः प्रत्ययः भवति तस्य पूरणे [13]इत्येतद्विषये । डटोऽपवादः । तत्संनियोगेन[14] त्रेः संप्रसारणं च भवति । त्रयाणां पूरणः तृतीयः । 'हलः' (६. ४. २/२५५९) इति संप्रसारणस्य दीर्घत्वं न भवति । अणः इति तत्रानुवर्तते [15]ढ्रलोपे (६. ३. १११/१७४) इत्यतः । पूर्वेण च णकारेणा[16]ण्ग्रहणम् ॥

---

1. इह नास्ति ब. क. फ. ग. 2. संख्यावाची ड. 3. भवति इति ड, विधीयते ह, भवति इति ज्ञायते क. 4. कतिथी कतिपयथी इत्यधिकम् ग. 5. बहुपूगगुणसंख्यानाम् क. 6. असंख्यावाचित्वात् ब. ड. फ. ग. 7. पूरणे ड. 8. एव इत्यधिकम् ब. 9. इथुगागमः ब. क. फ. 10. एतावतिथः नास्ति ह. 11. इत्येतस्मिन् ब. 12. अर्थे क. 13. इत्येतस्मिन् क. 14. च इत्यधिकम् ड. 15. ढ्रलोपे नास्ति फ. 16. अण्प्रत्याहारग्रहणम् क.